गवादयउष्ट्रान्ताः द्विशफाः द्विखुरानव । खरादयः चमर्य्यन्ता एकशफाः षट् । श्वादयोगोधान्ताःपञ्चनखा द्वादश२२। एवमेते भूचराः सप्तविंशतिः । मकरादयोजलचराः कङ्कादयश्च खगाः अभूचरत्वेनैकीकृत्य गृहीताः । तदेवमष्टाविंशतिभेदान् वदन्ति । तेषु कृष्णरुरुगौराः मृगविशेषाः अन्येषामपि तिर्य्यक्प्राणिनामेतेष्वेव यथायथमन्तभावः२३। अथ आहारसञ्चारोयस्य सोऽर्व्वाक्स्रोताः । दुःखमार्षम् । नृणां सर्गः । नृणां लक्षणम् । रजः अधिकं येषु२४। एते त्रयोवैकृताएव न कौमारवदुभयात्मकाः देवसर्गोवैकृत इत्यनुषङ्गः । वैकारिकस्तु देवसर्गः प्राकृतेषु पूर्व्वमेव प्रोक्तः अयन्तु ततोन्यूनत्वाद्वैकृतः देवसर्गएदन्तभूतः सनत्कुमारादीनान्तु सर्गः प्राकृतोवैकृतश्च देवत्वेन मनुष्यत्वेन च सृज्य इत्यर्थः२५ । वैकृतश्च देवसर्गोऽष्टविधः अत्र विबुधादयस्त्रयोभेदाः गन्धर्व्वाप्सरसएकः यक्षरक्षांस्येकः । भूतप्रेतपिशाचाएकः सिद्धचारणविद्याध्राः एकः किन्नराएकः आदिशब्दात् किंपुरुषाश्वमुखादयः” श्रीधरव्याख्या ।

एवं सामान्यतः सर्गमुक्त्वा तत्रैव २६अध्याये विशेष उक्तः “भगवानुवाच १० । यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ११ । पञ्चभिः पञ्चभिः ब्रह्म चतुर्भिर्दशभिस्तथा । एतच्चतुर्व्विंशतिकं गुणं प्राधानिकं विदुः १२ । महाभूतानि पञ्चैव भूरापोऽग्निर्म्मरुन्नभः । तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे । इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः । वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते । १३ । मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् । चतुर्द्धा लक्ष्यते भेदोवृत्त्या लक्षणरूपया १४ । एतावानेव संख्यातो ब्रह्मणः सगुणस्य च । सन्निवेशोमयाप्रोक्तोयः कालः पञ्चविंशकः १५ । प्रभावं पौरुषं प्राहुः कालमेके यतोभयम् । अहङ्कारविमूढस्य कर्त्तुः प्रकृतिमीयुषः १६ । प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि ! । चेष्टा यतः स भगवान् काल इत्युपलक्षितः१७। अन्तः पुरुषरूपेण कालरूपेण यो बहिः । तमन्वेत्येष सत्वानां भगवानात्ममायया १८ । दैवात् क्षुभितधर्म्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्य्यं सासूत महत्तत्वं हिरण्मयम् १९ । विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसा पिबत्तीव्रमात्मप्रस्वापनं तमः २० । यत्तत् सत्वगुणं स्वच्छं शान्तं भगवतः पदम् । यदाहुर्व्वासुदेवाख्यं चित्तं तन्महदात्मकम् २१ । स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा २२ । महत्तत्वाद्विकुर्व्वाणाद्भगवद्वीर्य्यसम्भवात् । क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत २३ । वैकारिकस्तैजसश्च तामसश्च यतोभवः । मनसश्चेन्द्रियाणाञ्च भूतानां महतामपि २४ । सहस्रशिरसं साक्षात् यमनन्तं प्रचक्षते । सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् २५ । कर्त्तृत्वं करणत्वञ्च कार्य्यत्वञ्चेति लक्षणम् । शान्तघोरविमूढत्वमिति वा स्यादहङ्कृतेः २६। वैकारिकाद्विकुर्व्वाणान्मनस्तत्त्वमजायत । यत्संकल्पविकल्पाभ्यां वर्त्तते कामसम्भवः २७ । यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् । शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः २८ । तैजसात्तु विकुर्व्वाणाद्बुद्धितत्त्वमभूत् सति । द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः २९ । संशयोऽथ विपर्य्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० । तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः । प्राणस्य हि क्रिया शक्तिर्बुद्धेर्व्विज्ञानशक्तिता ३१ । तामसाच्च विकुर्व्वाणाद्भगवद्वीर्य्यनोदितात् । शब्दमात्रमभूत्तस्मान्नभः श्रोत्रन्तु शब्दगम् २२ । अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च । तन्मात्रञ्चैव नभसो लक्षणं कवयो विदुः ३३ । भूतानां छिद्रदातृत्वं बहिरन्तरमेव च । प्राणेन्द्रियात्मधिष्ण्यत्वं नभसोवृत्तिलक्षणम् ३४ । नभसः शब्दतन्मात्रात् कालगत्या विकुर्व्वतः । स्पर्शोऽभवत्ततोवायुस्त्वक् स्पर्शस्य तु संग्रहः ३५ । मृदुत्वं कठिनत्वञ्च शैत्यमुष्णत्वमेव च । एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३६ । चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः । सर्व्वेन्द्रियाणामात्मत्वं वायोः कर्म्माभिलक्षणम् । वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् । समुत्थितं ततस्तेजश्चक्षूरूपोपलम्भनम् । द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च । तेजस्त्वं तेजसः साध्वि ! । रूपमात्रस्य वृत्तयः ३८ । द्योतनं पचनं पानमदनं हिममर्दनम् । तेजसोवृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च । रूपमात्राद्विकुर्व्वाणात्तेजसोदैवनोदितात् । रसमात्रमभूत्तस्मादम्भोजिह्वा रसग्रहः ४०। कषायोमधुरस्तिक्तः कट्वम्ल इति नैकधा । भौतिकानां विकारेण रस एकोविभिद्यते ४१ । क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोद(न्द)नम् । तापापनोदोभूयस्त्वमम्भसो वृत्तयस्त्विमाः ४२ । रसमात्राद्विकुर्व्वाणादम्भसो दैवनोदितात् । गन्धमात्रमभूत्तस्मात् पृथ्वीघ्राणस्तु गन्धगः ४३ । करम्भपूतिसौरभ्यशान्तोग्रा-